## द्व्यन्तरुपसर्गेभ्योऽप ईत्। (९७/९४१)

द्वि अन्तर् इत्येताभ्यां उपसर्गाच्च उत्तरस्य अप् इत्येतस्य ईकारादेशो भवति। द्वीपम्। अन्तरीपम्। उपसर्गात् – नीपम्। वीपम्। समीपम्।

[७६०] समाप ईत्वे प्रतिषेधो वक्तव्यः। (म.भा. ३.१७३)

समापं नाम देवयजनम्। अपर आह –

[७६१] ईत्वमनवर्णादिःति वक्तव्यम्। (म.भा. ३.१७३)

इह मा भूत्, प्रापम्, परापम्। अप्शब्दं प्रति क्रियायोगाभावात् उपसर्गग्रहणं प्राद्युपलक्षणार्थम्॥

## ऊदनोर्देशे। (९८/९४२)

अनोरुत्तरस्य अपः ऊकारादेशो भवति देशाभिधाने। अनूपो देशः। देशे इति किम्? अन्वीपम्। दीर्घोच्चारणमवग्रहार्थम्, अनु ऊपः अनूपः इति॥

## अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। (९९/१०२५)

अषष्ठीस्थस्य अतृतीयास्थस्य चान्यशब्दस्य दुगागमो भवति आशिस् आशा आस्था आस्थित उत्सुक ऊति कारक राग छ इत्येतेषु परतः। अन्या आशीः अन्यदाशीः। अन्या आशा अन्यदाशा। अन्या आस्था अन्यदास्था। अन्य आस्थितः अन्यदास्थितः। अन्य उत्सुकः अन्यदुत्सुकः। अन्या ऊतिः अन्यदूतिः। अन्यः कारकः अन्यत्कारकः। अन्यः रागः अन्यद्रागः। अन्यस्मिन् भवः अन्यदीयः। गहादिष्वन्यशब्दो (४.२.१३८/१३६२) द्रष्टव्यः। अषष्ठ्यतृतीयास्थस्य इति किम्? अन्यस्य आशीः अन्याशीः। अन्येन आस्थितः अन्यास्थितः।

दुगागमोऽविशेषेण वक्तव्यः कारकच्छयोः।
षष्ठीतृतीययोर्नेष्ट आशीरादिषु सप्तसु॥

अन्यस्य कारकम् अन्यत्कारकम्। अन्यस्य इदम् अन्यदीयम्। अस्य च द्विर्नञ्ग्रहणं लिङ्गम्॥

## अर्थे विभाषा। (१००/१०२६)

अर्थशब्दे उत्तरपदे अन्यस्य विभाषा दुगागमो भवति। अन्यदर्थः, अन्यार्थः॥

## कोः कत् तत्पुरुषेऽचि। (१०१/१०२७)

कु इत्येतस्य कत् इत्ययमादेशो भवति तत्पुरुषे समासे अजादावुत्तरपदे। कदजः। कदश्वः। कदुष्ट्रः। कदन्नम्। तत्पुरुषे इति किम्? कूष्ट्रो राजा। अचि इति किम्? कुब्राह्मणः। कुपुरुषः।

[७६२] कद्भावे त्रावुपसङ्ख्यानम्। (म.भा. ३.१७३)

कुत्सितास्त्रयः कत्त्रयः॥